रूपवत्त्वं च न सामान्यतः प्रतिबिम्बप्रयोजकं शब्दस्यापि प्रतिध्वनिरूपप्रतिबिम्बदर्शनात् । न च शब्दजन्यं शब्दान्तरमेव प्रतिध्वनिरिति वाच्यं स्फटिकलौहित्यादेरपि जपासन्निकर्षजन्यतापत्त्या प्रतिबिम्बमिथ्यात्वसिद्धान्तक्षतेरिति । प्रतिबिम्बस्य बुद्धेरेव परिणामविशेषो बिम्बाकारो जलादिगत इति मन्तव्यम् । केचित् तु वृत्तौ प्रतिबिम्बितं सदेव चैतन्यं वृत्तिं प्रकाशयति तथा वृत्तिगतप्रतिबिम्ब एव वृत्तौ चैतन्यविषयता न तु चैतन्ये वृत्तिप्रतिबिम्बोऽस्तीत्याहुः । तदसत्; उपदर्शितशास्त्रविरोधेन केवलतर्कस्याप्रयोजकत्वात् विनिगमनाविरहेण वृत्तिचैतन्ययोरन्योन्यविषयताख्यसम्बन्धरूपतयान्योन्यस्मिन्नन्योन्यप्रतिबिम्बसिद्धेश्च । बाह्यस्थलेऽर्थाकारताया एव विषयतारूपत्वसिद्ध्याऽऽन्तरेऽपि तत्तदर्थाकारताया एव विषयतात्वौचित्याच्चेति । ये तु तार्किका ज्ञानस्य विषयतां नेच्छन्ति तन्मते ज्ञानव्यक्तीनामनुगमकधर्माभावेन घटविषयकं पटविषयकं ज्ञानमित्याद्यनुगतव्यवहारानुपपत्तिः । केचित् तु तार्किका अनयैवानुपपत्त्या विषयतामतिरिक्तपदार्थमाहुः । तदप्यसत् अनुभूयमानानामर्थाकारतां विहाय विषयतान्तरकल्पने गौरवादिति । ननु तथापि स्वस्वोपाधिवृत्तिरूपैव वृत्तिचैतन्ययोरन्योन्यविषयतास्तु स्वोपाधिवृत्तित्वेनैवानुगमादलमाकाराख्यप्रतिबिम्बद्वयेनेति चेन्न प्रतिबिम्बं विना स्वत्वस्यापि दुर्वचत्वात् । स्वत्वं हि स्वभुक्तवृत्तिवासनावत्त्वम् । भोगश्च ज्ञानम् । तथा च विषयतालक्षणस्य विषयसामग्रीघटितत्वेनात्माश्रयः । तस्मादचैतन्यचैतन्ययोरन्योन्यविषयतारूपोऽन्योन्यस्मिन्नन्योन्यप्रतिबिम्बः सिद्धः । अधिकन्तु योगवार्त्तिके द्रष्टव्यमिति दिक् । अत्रायं प्रमात्रादिविभागः । 'प्रमाता चेतनः शुद्धः प्रमाणं वृत्तिरेव नः । प्रमार्थाकारवृत्तीनां चेतने प्रतिबिम्बनम् । प्रतिबिम्बितवृत्तीनां विषयो मेय उच्यते । साक्षाद्दर्शनरूपं च साक्षित्वं वक्ष्यति स्वयम् । अतः स्यात् कारणाभावाद्वृत्तेः साक्ष्येव चेतनः । विषयादेः सर्वसाक्षित्वं गौणं लिङ्गाद्यभावतः ।"
"ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे" देवीमा० । "कषाये कर्मभिः पक्के ततो ज्ञानं प्रजायते" वेदा० । २४परब्रह्मणि च "सत्यं ज्ञानमानन्दं ब्रह्म" श्रुतिः । २५विष्णौ "सर्वज्ञः ज्ञानमुत्तमम्" विष्णुस० ।

**ज्ञानकृत** त्रि० ज्ञानेन कृतम् । बुद्धिपूर्वकृते तत्र पापस्य बुद्धिपूर्वकृतत्वे विशेषः प्रा० त० उक्तो यथा "गोबधस्य बुद्धिपूर्वकत्वं तदा भवति यदि गां ज्ञात्वा एनां हन्मीतीच्छया हन्ति तदा कामनाद्वारैव ज्ञानस्य प्रवृत्त्यङ्गत्वात्" "इत्यञ्च गवयादिभ्रमेण यो गोबधस्तत्र गोबधस्य न ज्ञानकृतत्वम् गोत्वेनाज्ञानात् यदि गोत्वेन जानन्नप्यन्योद्देशेन क्षिप्तनाराचादिना गां हन्ति तदापि न ज्ञानकृतत्वं तद्विषयत्वेनेच्छारूपद्वाराभावात्" ।

**ज्ञानगम्य** पु० ज्ञानेनैव गम्यः न कर्मणा न वा ज्ञानकर्मभ्याम् । ज्ञानमात्रगम्ये परमेश्वरे ; "उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः" विष्णुस० ।

**ज्ञानचक्षुस्** पु० ज्ञानं ज्ञानसाधनं वेदादिशास्त्रं चक्षुरिवास्य । शास्त्रावबोधेन सर्वार्थप्रकाशयुक्ते कर्म० । विदुषि२शास्त्ररूपे नेत्रे च "सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा" मनुः ।

**ज्ञानदग्धदेह** पु० ज्ञानेनैव दग्धो देहोऽस्य । चतुर्थाश्रमिणि भिक्षौ तस्य ज्ञानेनैव जीवतोऽपि दग्धदेहत्वात् मृतस्य न दाहान्तरं कार्य्यं यथोक्तं शौनकेन "सर्वसङ्गनिवृत्तस्य ध्यानयोगरतस्य च । न तस्य दहनं कार्य्यं नैव पिण्डोदकक्रिया । निदध्यात् प्रणवेनैव बिले भिक्षोः कलेवरम् । प्रोक्षणं खननञ्चापि सर्वं तेनैव कारयेत्" । [ त्रिका० ।

**ज्ञानदर्पण** पु० ज्ञानं दर्पण इवास्य । पूर्वजिने मञ्जुघोषे

**ज्ञानद** त्रि० ज्ञानं ददाति दा—क । १गुरौ २उपदेष्टरि च ३सरस्वत्यां स्त्री ।

**ज्ञानदातृ** त्रि० ज्ञानस्य दाता । उपदेष्टरि गुरौ "पितुर्दश गुणा माता गौरवेणेति निश्चितम् । मातुः शतगुणः पूज्यो ज्ञानदाता गुरुः प्रभो !" तन्त्र० । २ज्ञानस्य दायकमात्रे त्रि० स्त्रियां ङीप् ।

**ज्ञाननिष्ठ** त्रि० ज्ञाने निष्ठाऽस्य । ज्ञानसाधनयुते तत्त्वविदुषि ।

**ज्ञानपति** पु० ६त० । ज्ञानस्योपदेष्टृत्वात् स्वामिनि गुरौ २परमेश्वरे च । ततः अश्वपत्या० अपत्यादौ अण् । ज्ञानपत तदपत्ये पुंस्त्री स्त्रियां ङीप् ।

**ज्ञानपावन** न० ज्ञानमिव पावनम् । तीर्थभेदे "ततो गच्छेत राजेन्द्र ! ज्ञानपावनमुत्तमम् । अग्निष्टोममवाप्नोति मुनिलोकञ्च गच्छति" भा० व० ८४ अ० ।

**ज्ञानमय** पु० ज्ञान+मयट् । १परमेश्वरे परब्रह्मणि २शिवे च ।

**ज्ञानमुद्रा** स्त्री "तर्ज्जन्यङ्गुष्ठकौ सक्तावग्रतो विन्यसेद्धृदि । वामहस्ताम्बुजं वामजानुमूर्द्धनि विन्यसेत् । ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य प्रेयसी" तन्त्रसारोक्ते रामार्चनाङ्गे मुद्राभेदे ।